# सुन्दरकाण्ड त्रिपञ्चाशः सर्गः (५३) - ॥ पुच्छदाहनम् ॥

तस्य तद् वचनं श्रुत्वा दशग्रीवो महाबलः ।
देशकाल हितं वाक्यं भ्रातु रुत्तर मब्रवीत् ॥ १ ॥

सम्यगुक्तं हि भवता दूतवध्या विगर्हिता ।
अवश्यं तु वधादन्यः क्रियतामस्य निग्रहः ॥ २ ॥

कपीनां किल लाङ्गूल मिष्टं भवति भूषणम् ।
तदस्य दीप्यतां शीघ्रं तेन दग्धेन गच्छतु ॥ ३ ॥

ततः पश्यन् त्विमं दीनमङ्ग वैरूप्य कर्शितम् ।
समित्र ज्ञातयः सर्वे बान्धवाः ससुहृज् जनाः ॥ ४ ॥

आज्ञापयद् राक्षसेन्द्रः पुरं सर्वं सचत्वरम् ।
लाङ्गूलेन प्रदीप्तेन रक्षोभिः परिणीयताम् ॥ ५ ॥

तस्य तद् वचनं श्रुत्वा राक्षसाः कोप कर्कशाः ।
वेष्टयन्ति स्म लाङ्गूलं जीर्णैः कार्पासिकै पटैः ॥ ६ ॥

संवेष्ट्यमाने लाङ्गूले व्यवर्धत महाकपिः ।
शुष्क मिन्धन मासाद्य वनेष्विव हुताशनः ॥ ७ ॥

तैलेन परिषिच्याथ तेऽग्निं तत्राव पातयन् ।
लाङ्गूलेन प्रदीप्तेन राक्षसांस्ता नपातयत् ॥ ८ ॥

रोषामर्ष परीतात्मा बालसूर्य समाननः ।
लाङ्गूलं सम्प्रदीप्तं तु द्रष्टुं तस्य हनूमतः ॥ ९ ॥

सहस्त्रीबालवृद्धाश्च जग्मुः प्रीता निशाचराः ।
स भूयः सङ्गतैः क्रूरै राक्षसैर् हरिसत्तमः ॥ १० ॥

निबद्धः कृतवान् वीरस् तत्काल सदृशीं मतिम् ।
कामं खलु न मे शक्ता निबद्धस्यापि राक्षसाः ॥ ११ ॥

छित्त्वा पाशान् समुत्पत्य हन्या मह मिमान्पुनः ।
यदि भर्तृ हितार्थाय चरन्तं भर्तृ शासनात् ॥ १२ ॥

बध्नन्त्येते दुरात्मनो न तु मे निष्कृतिः कृता ।
सर्वेषामेव पर्याप्तो राक्षसाना महं युधि ॥ १३ ॥

किं तु रामस्य प्रीत्यर्थं विषहिष्येऽह मीदृशम् ।
लङ्का चारयितव्या वै पुनरेव भवेदिति ॥ १४ ॥

रात्रौ न हि सुदृष्टा मे दुर्ग कर्म विधानतः ।
अवश्यमेव द्रष्टव्या मया लङ्का निशाक्षये ॥ १५ ॥

कामं बद्धस्य मे भूयः पुच्छस्योद् दीपनेन च ।
पीडां कुर्वन्तु रक्षांसि न मेऽस्ति मनसः श्रमः ॥ १६ ॥

ततस्ते संवृताकारं सत्त्ववन्तं महाकपिम् ।
परिगृह्य ययुर्हृष्टा राक्षसाः कपि कुञ्जरम् ॥ १७ ॥

शङ्ख भेरी निनादैस्तं घोषयन्तः स्वकर्मभिः ।
राक्षसाः क्रूर कर्माणश् चारयन्ति स्म तां पुरीम् ॥ १८ ॥

अन्वीयमानो रक्षोभिर् ययौ सुख मरिन्दमः ।
हनूमांश् चारयामास राक्षसानां महापुरीम् ॥ १९ ॥

अथा पश्यद् विमानानि विचित्राणि महाकपिः ।
संवृतान् भूमिभागांश्च सुविभक्तांश्च चत्वरान् ॥ २० ॥

वीथीश्च गृह सम्बाधाः कपिः शृङ्गाटकानि च ।
तथा रथ्योप रथ्याश्च तथैव गृह कान्तरान् ॥ २१ ॥

गृहांश्च मेघ सङ्काशान् ददर्श पवनात्मजः ।
चत्वरेषु चतुष्केषु राजमार्गे तथैव च ॥ २२ ॥

घोषयन्ति कपिं सर्वे चारीक इति राक्षसाः ।
स्त्री बाल वृद्धा निर्जग्मुस् तत्र तत्र कुतूहलात् ॥ २३ ॥

तं प्रदीपित लाङ्गूलं हनुमन्तं दिदृक्षवः ।
दीप्यमाने ततस् तस्य लाङ्गूलाग्रे हनूमतः ॥ २४ ॥

राक्षस्यस्ता विरूपाक्ष्यः शंसुर् देव्यास् तदप्रियम् ।
यस्त्वया कृत संवादः सीते ताम्रमुखः कपिः ॥ २५ ॥

लाङ्गूलेन प्रदीप्तेन स एष परिणीयते ।
श्रुत्वा तद्वचनं क्रूर मात्माप हरणोपमम् ॥ २६ ॥

वैदेही शोक सन्तप्ता हुताशन मुपागमत् ।
मङ्गलाभि मुखी तस्य सा तदासीन् महाकपेः ॥ २७ ॥

उपतस्थे विशालाक्षी प्रयता हव्य वाहनम् ।
यद्यस्ति पति शुश्रूषा यद्यस्ति चरितं तपः ॥ २८ ॥

यदि वास्त्येक पत्नीत्वं शीतो भव हनूमतः ।
यदि किञ्चि दनुक्रोशस् तस्य मय्यस्ति धीमतः ॥ २९ ॥

यदि वा भाग्य शेषो मे शीतो भव हनूमतः ।
यदि मां वृत्त सम्पन्नां तत् समागम लालसाम् ॥ ३० ॥

स विजानाति धर्मात्मा शीतो भव हनूमतः ।
यदि मां तारयेदार्यः सुग्रीवः सत्य सङ्गरः ॥ ३१ ॥

अस्माद् दुःखाम्बु संरोधाच् छीतो भव हनूमतः ।
ततस् तीक्ष्णार्चिर व्यग्रः प्रदक्षिण शिखोऽनलः ॥ ३२ ॥

जज्वाल मृग शाबाक्ष्याः शंसन्निव शिवं कपेः ।
हनुमज् जनकश्चापि पुच्छानल युतोऽनिलः ॥ ३३ ॥

ववौ स्वास्थ्यकरो देव्याः प्रालेयानिल शीतलः ।
दह्यमाने च लाङ्गूले चिन्तयामास वानरः ॥ ३४ ॥

प्रदीप्तोऽग्नि रयं कस्मान् न मां दहति सर्वतः ।
दृश्यते च महाज्वालः न करोति च मे रुजम् ॥ ३५ ॥

शिशिरस्येव सम्पातो लाङ्गूलाग्रे प्रतिष्ठितः ।
अथवा तदिदं व्यक्तं यद् दृष्टं प्लवता मया ॥ ३६ ॥

राम प्रभावा दाश्चर्यं पर्वतः सरितां पतौ ।
यदि तावत् समुद्रस्य मैनाकस्य च धीमतः ॥ ३७ ॥

रामार्थं सम्भ्रमस् तादृक् किमग्निर्न करिष्यति ।
सीतायाश् चानृशंस् येन तेजसा राघवस्य च ॥ ३८ ॥

पितुश्च मम सख्येन न मां दहति पावकः ।
भूयः स चिन्तयामास मुहूर्तं कपि कुञ्जरः ॥ ३९ ॥

उत्पपाताथ वेगेन ननाद च महाकपिः ।
पुरद्वारं ततः श्रीमान् शैल शृङ्ग मिवोन्नतम् ॥ ४० ॥

विभक्त रक्षःसम्बाध मासमादा निलात्मजः ।
स भूत्वा शैल सङ्काशः क्षणेन पुनरात्मवान् ॥ ४१ ॥

ह्रस्वतां परमां प्राप्तो बन्धनान् यवशातयत् ।
विमुक्तश् चाभवच् छ्रीमान् पुनः पर्वत सन्निभः ॥ ४२ ॥

वीक्षमाणश्च ददृशे परिघं तोरणाश्रितम् ।
स तं गृह्य महाबाहुः कालायस परिष्कृतम् ।
रक्षिणस् तान् पुनः सर्वान् सूदयामास मारुतिः ॥ ४३ ॥

स तान् निहत्वा रण चण्ड विक्रमः
समीक्षमाणः पुनरेव लङ्काम् ।
प्रदीप्त लाङ्गूल कृतार्चिमाली
प्रकाश तादित्य इवार्चिमाली ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥